# वेदान्तसार:

- प्रस्तुतकर्त्री
- डॉ.पूजा मनमोहनोपाध्याया
- सहयिकाचार्या
- विशिष्टसंस्कृतविभाग:
- महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालय:

# वेदान्तसारः

## अनुबन्ध चतुष्टयम्

तत्र अनुबन्धो नाम अधिकारिविषयसम्बन्धप्रयोजनानि ।

अनुबन्धचतुष्टयम् – 1 अधिकारी

2 विषयः

3 सम्बन्धः

4 प्रयोजनम्

# अधिकारी

अधिकारिणमाशास्ते फलसिद्धिर्विशेषतः ।
उपाया देशकालाद्याः सन्त्यस्मिन्सहकारिणः

14 – विवेक चूड़ामणिः ।

अधिकारी तु विधिवदधीतवेदांगत्वेनापाततोऽधिगताखिलवेदार्थो –ऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरः सरं नित्यनैमित्तिक प्रायश्चित्तोपासनानुष्ठानेन निर्गत निखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता ।

- विधिवदधीतवेदांगत्वेनापाततोऽधिगताखिलवेदार्थः
- अस्मिन् जन्मनि जन्मान्तरे वा
- काम्यनिषिद्धवर्जनपुरः सरं नित्यनैमित्तिक प्रायश्चित्तोपासनानुष्ठानेन
- निर्गत निखिलकल्मषतया नितान्तनिर्मलस्वान्तः
- साधनचतुष्टयसम्पन्नः प्रमाता

वेदाः – 1 ऋग्वेदः

2 यजुर्वेदः

3 सामवेदः

4 अथर्ववेदः

वेदांगानि – 1 शिक्षा

2 कल्पः

3 निरूक्तम

4 व्याकरणम्

5 छन्दः

6 ज्योतिषम्

# कर्माणि

- काम्यानि (स्वर्गादिष्ट–साधनानि) ज्योतिष्टोमादीनि
- निषिद्धानि (नरकाद्यनिष्ट–साधनानि) ब्राह्मणहननादीनि
- नित्यानि (अकरणे प्रत्यवाय–साधनानि) सन्ध्यावन्दनादीनि

# कर्माणि

- नैमित्तिकानि
  - (पुत्रजन्माद्य–नुबन्धीनि) जातेष्ट्यादीनि
- प्रायश्चित्तानि
  - (पापक्षयसाधनानि) चान्द्रायणादीनि
- उपासनानि
  - (सगुणब्रह्मविषय मानसव्यापाररूपाणि) शाण्डिल्यविद्यादीनि

# साधनचतुष्टयम्

- नित्यानित्य–वस्तुविवेक:
- इहामुत्रार्थफल–भोगविराग:
- शमादि – षट्कसम्पत्ति:
- मुमुक्षत्वम्

# षट्सम्पत्ति:

- शम:
- दम:
- उपरति:
- तितिक्षा
- श्रद्धा
- समाधानम्

- शमः – श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः ।।
- दमः – बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् ।।
- उपरतिः – निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्यो उपरमणमुपरति अथवाविहितानां कर्मणां विधिना परित्यागः ।।
- तितिक्षा – शीतोष्णादिद्वन्द्वसहिष्णुता ।।
- श्रद्धा – गुरूपदिष्टवाक्येषु विश्वासः ।।
- समाधानम् – निगृहीतस्य मनः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् ।।

प्रशान्तचित्ताय जितेन्द्रियाय च प्रहीणदोषाय यथोक्तकारिणे ।

गुणान्वितायायानुगताय सर्वदा प्रदेयमेतत् सकलं मुमुक्षवे ।।

अन्वयः – प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे गुणान्विताय अनुगताय च मुमुक्षवे एतत् सकलं सर्वदा प्रदेयम् ।।

- विषय :— जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्र एव वेदान्तानां तात्पर्यात् ।।
- सम्बन्धः— तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत् प्रमाणस्य च बोध्यबोधकभावः ।।
- प्रयोजनम्— तदैक्यप्रमेयगताज्ञाननिवृत्तिः, स्वस्वरूपानन्दावाप्तिश्च (''तरति शोकम् आत्मवित्''इत्यादि श्रुतेः ''ब्रह्मविद् ब्रह्मैव भवति'' इत्यादि श्रुतेश्च)

# अनुबन्धचतुष्टयम्

## अधिकारी

- अधीतवेद्वेदांगानि
- काम्यनिषिद्धकर्मणां –त्यागः
- नित्यनैमित्तिकादि कर्मणा निर्मलः
- साधनचतुष्टयसम्पन्नः
  – नित्यानित्य वस्तुविवेकः
  – इहामुत्रार्थफलभोगविरागः
  – शमादिषट्कसम्पत्तिः
  – मुमुक्षत्वम्

## विषयः

जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयम्

## सम्बन्धः

बोध्यबोधक भावः

## प्रयोजनम्

अज्ञाननिवृत्तिपूर्वकं स्वस्वरूपानन्दावाप्तिः

# धन्यवाद